सापत्ने भ्रातरि "असंसृष्ट्यपि चादद्यात् संसृष्टोनान्यमातृजः" इति याज्ञ० तादृशभगिन्यां स्त्री ।

**अन्यलिङ्ग** पु० अन्यस्य स्वविशेष्यस्य लिङ्गमिव लिङ्गमस्य । विशेष्यलिङ्गानुसारिलिङ्गके शब्दे । वा कप् । अन्यलिङ्गकोऽप्युक्तार्थे "ज्ञेयाः सप्तान्यलिङ्गकाः" इत्यमरः ।

**अन्यवर्ण** पुंस्त्री अन्यो वर्णः यस्य । सविजातीयवर्णे यथा ब्राह्मणस्य क्षत्रियः क्षत्रियस्य वैश्यजातिरित्यादि ।

**अन्यवादिन्** पु० अन्यथा प्रतिज्ञातार्थादन्यथा वदति वद–णिनि । हीनप्रतिज्ञे वादिनि–प्रतिवादिनि च । "अन्यवादो क्रियाद्वेषी नोपस्थायी निरुत्तरः । आहूतः प्रपलायी च हीनः पञ्चविधः स्मृत" इति नारदसंहिता ।

**अन्यविवर्द्धित** पुंस्त्री० अन्यया स्वमातृभिन्नया विवर्द्धितः पुंवत् । कोकिले । परवर्द्धितमात्रे त्रि० ।

**अन्यव्रत** त्रि० अन्यत् वैदिकाद्भिन्नं व्रतं कर्म्म यस्य । श्रुतिस्मृति-विहितव्यतिरिक्तकर्म्मकारके असुरादौ यथेष्टाचारिमानुषे च । "अपद्वेषो अपह्वरोऽन्यव्रतस्य ऋ० ५,२०२, अकर्म्मा दस्युरभि नो अमन्तुरन्यव्रतोऽमानुषः ऋ० १०,२२,८, ।

**अन्यशाख** पु० अन्या स्वाध्यायभिन्ना शाखा वेदभागभेदो यस्य । स्वाध्यायवेदशाखाभिन्नशाखाध्यायिनि "अन्यशाखोद्भवोदत्तो गृहीतश्चोपनायित" इति दत्तक० च० स्मृतिः । वा–कप् । अन्यशाखकोऽप्युक्तार्थे । स्वशाखासुत्सृज्य अन्यशाखामध्येतरि च । स्वार्थे कन् । शाखारण्डे ।

**अन्यसाधारण** त्रि०अन्येन साधारणः । अन्येन सदृशे, "अप्य प्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म्मेति" कु० अन्यस्य साधारण्यवति स्वपरस्वत्वास्पदीभूते साधारणे वित्तादौ ।

**अन्यादृक्ष** त्रि० अन्य इव पश्यति अन्य+दृश–"कर्त्तरि क्त" पा० उक्तेः कर्म्मकर्त्तरि क्स, कर्म्मणि सक् इति मु०बो० । अन्यादृशे । क्विन् । अन्यादृगप्यत्र स्त्रियां ङीप् । कञ् । अन्यादृशस्तत्रार्थे "इमे नूनमीदृशा अन्यादृशा" इति छा०उप० । स्त्रियां ङीप् ।

**अन्याय** पु०न्यायो विचारः, सङ्गतिःऔचित्यं, प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यञ्च अभावार्थे न०त० । विचाराभावे, सङ्गत्यभावे, अनौचित्ये, पञ्चाङ्गन्यायाभावे च न्यायशब्दार्थे त्वधिकं वक्ष्यते । न०ब० । विचारशून्ये, औचित्यशून्ये, असङ्गते, प्रतिज्ञादिपञ्चकवाक्यशून्ये च त्रि० । "अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः" इति स्मृतिः । "अन्यायेनापि यद्भुक्तं बहून्यब्दशतानि चेति" नारदस० ।

**अन्याय्य** त्रि० न न्याय्यः । न्यायादनपेतभिन्ने अनुचिते ।

**अन्यार्थ** पु० अन्योऽर्थः वा दुगभावः । भिन्नार्थे । अन्योर्थः-अभिधेयं प्रयोजनं वास्य । भिन्नाभिधेयवाचके, शब्दे भिन्नप्रयोजनके पदार्थे च त्रि० ।

**अन्यून** त्रि० न न्यूनम् । हीनभिन्ने व्याप्यभिन्ने च । "अन्यूनानतिरिक्तवृत्तित्वमवच्छेदकत्वमिति" न्यायप्रकरणम् ।

**अन्यूनाधिक** त्रि० न न्यूनं नाप्यधिकम् । समानभावप्राप्ते न्यूनाधिकतारहिते ।

**अन्यूनानतिरिक्त** त्रि० अन्यूनः अहीनः अनतिरिक्तः नाधिकः विशेषणयोरप्येकस्य विशेष्यताविवक्षया क० । समाने । "अन्यूनातिरिक्ताङ्गीं योषितं सौम्यदर्शनामिति"स्मृतिः । अन्यूनानतिरिक्तवृत्तित्वमिति न्या०प्र० ।

**अन्येद्युष्क** त्रि० अन्येद्युः अन्यस्मिन्नहनि भवः कन् उदुपधत्वात् षत्वम् । अन्यदिवसभवे । "अन्येद्युष्कमहोरात्रादेककालं प्रवर्त्तते इति" सुश्रुतम् ।

**अन्येद्युस** अव्य० अन्यस्मिन्नहनि अन्य+एद्युस् । अन्यदिवसे इत्यर्थे "परेद्यव्यद्य पूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्निति" भट्टिः "अन्येद्युरात्मानुचरस्य भावमिति" रघुः ।

**अन्योढा** स्त्री अन्येन ऊढा । परकीयनायिकायाम् "यात्रादिनिरताऽन्योढा कुलटा गलितत्रपेति" सा० द० ।

**अन्योदर्य्य** पु० अन्यस्मिन् स्वमातृभिन्ने उदरे गर्भे भवः उदर+यत् । एकपितृके भिन्नमातृके वैमात्रेये भ्रातरि । "अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्योधनं हरेरिति याज्ञ० स्मृतिः । तथाभगिन्यां स्त्री । अन्योदरजातमात्रे त्रि० अतएव दायभागे तद्वचनव्याख्याने भ्रातृपुत्रादीनामपि अन्योदर्य्यपदार्थतया दायाधिकार उक्तः ।

**अन्योन्य** त्रि० अन्य+कर्म्मव्यतिहारे (एकजातीयक्रियाकरणे) द्वित्वम् पूर्व्वपदे सुश्च । परस्परार्थे । "अन्योन्यमुत्पीड़यदुत्पलाक्ष्याः स्तनद्वयं पाण्डु तथा प्रवृद्धमिति" "अन्योन्यसंसक्तमहस्त्रियामम्" "अन्योन्यसंसर्गनिमीलिताक्षौ" इति "अन्योन्यलोलानि विलोचनानिनोति" च कुमा० कृतद्वित्वस्यापि सर्व्वनामता तेनान्योऽन्यस्मै इत्यादि । "अन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्येति" शारी० भा० । "तावेतावन्योन्यस्मिन् प्रतिष्ठितौ" इति वृ० उ० अन्योन्यस्मा एवैतच्छ्रिया प्रतिष्ठमानाय इति कौ० ब्रा० "अन्योन्यमुभयोरेकक्रियायाः करणं मतमि"त्युक्तलक्षणे अर्थालङ्कारभेदे न० । "त्वया सा शोभते तन्वी तया